११६४

No. ११६४-घ

Title पुरश्चरणाविधि:

Author शैवगोपीनाथ:

Extent १३ Age

Subject तन्त्रम् · सम्पूर्णम्

नं० ११६४-घ

पुरश्चरणविधिः (तन्त्रम्)

पत्राणि १३ (सम्पूर्णम्)

९३

नं० ११७५-घ

दातृ शैवगोपीनाथः

नं० ११८४-च

पुरश्चरणविधिः (तन्त्रम्)

पत्राणि १३ (सम्पूर्णम्)

कर्त्ता शैवगोपीनाथः

श्रीगणेशायनमः ओंशिवादींश्च गुरून्नत्वा पुरश्चरणमुच्यते विनानयेनसिद्धिःस्यान्मंत्रोवर्षशतैरपि १
सावश्यकतास्यसंप्रति ततः संक्षेपतस्तद्विधिं वक्ष्ये पूर्वसमीरिताखिलमनुन्यासक्रियामभ्यसेत् गत्वा
स्वगुरोस्समीपवरं संप्रार्थयेत्सादरं सतशिष्यः प्रथमं ततश्च स्तादनुष्ठानांगदीक्षां पुन २ गुरुरपि शु
भकाले देशिकाय प्रदद्यादखिलसुखसमृद्ध्यै मंत्रराजस्य दीक्षां तदिह वहुभिरुक्ता मासतिथ्यृक्ष
वाराः क्रमतइह लिखामि श्रेयसे ये त्र संति ३ वैशाखे श्रावणे वापि आश्विने कार्तिके तथा फाल्गुणे मार्गशी
र्षे वा कुर्यान्मंत्रस्य दीक्षणं ४ पूर्णिमा पंचमी चैव द्वितीया सप्तमी तथा· त्रयोदशी च दशमी प्रशस्ता सर्वकाम
दा ५ तृतीया पंचमी वा षष्ठी वापि विशेषतः द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा ६ कुत्रचिन्निषिद्ध
त्वा सप्तमीत्रयोदश्योर्मध्यमत्वं ग्रंथांतरे षष्ठी भाद्रपदे मासि शुक्ले त्रयोदशी कार्त्तिके नवमी शुक्ला श्राव
णे कृष्णपंचमी ७ एतानि देवपर्वाणि तीर्थकोटिफलानि च कृष्णाष्टम्यां चतुर्दश्यां पंचपर्वदिने तथा ८
ग्रहणादौ व्यतीपाते परिवेषेंदुसूर्ययोः नवारमासदोषोस्ति ग्रहणे चंद्रसूर्ययोः ग्रहणं देवदेवेशि कालः
सप्तदिनावधि अयनक्षत्राणि अश्विनी रोहिणी स्वाति विशाखा हस्तभेषु च श्रवणाद्रो धनिष्ठा च पुष्यः

शतभिषक्तथा दीक्षानक्षत्रजातानि स्याद्रुसंज्ञार्थकोविदाः रवौ गुरौ च बुधो दीक्षा कर्तव्या बुधशुक्रयोर्मं
त्रारंभौ रवौ शुक्रे बुधे जीवे विशेषतः शनौ मृत्युर्हा यौ भौमे सर्वच तिः फलमिति वचनात्सोमस्य मध्यत्वं
सिद्धं तत्र शेषरे शरत्काले वैशाखे दीक्षा श्रेष्ठफलप्रदा फाल्गुने मार्गशीर्षे च ज्येष्ठे दीक्षा च मध्यमाः
आषाढे श्रावणे माघे कनिष्ठा सम्प्रदीरिता निंदितश्चाधिमासस्तु पौषो भाद्रपदस्तथा निंदितेऽपि मा
सेषु दीक्षां कारयेत्तु शुभां ग्रंथांतरे गुरुशुक्रोदये शुद्धे लग्ने सद्वारशोधिते चंद्रतारानुकूल्ये शुभ
ग्रहे चंद्रसूर्ययोः दीक्षाविधेया मंत्रज्ञैः पुरुषार्थप्रसिद्धये न मासतिथिवारादिशोधनं सूर्यपर्वणि दर्श १५
तिथिं च मन्त्री यातस्मिन्काले गुरोर्नरः सिद्धिर्भवति मंत्रस्य विनाभ्यासेन वेगतः प्रबुद्धेवल
संयुक्ते शुक्रे देवगुरौ तथा शुक्लपक्षे च कृष्णे वा दीक्षा सर्वशुभावहा कालांतरे मुक्तिका
मे कृष्णपक्षे भुक्तिकामे सिते सदा संहितायां मेषकर्कटकन्यासु तुलायां वृश्चिके तथा
या मकरकुंभयोश्चैव दीक्षा सर्वशुभावहा रुद्रयामले सतिथेः कलविधुर्मासे तथाद

मनपर्वणि मंत्रदीक्षा प्रकुर्वीत सोमासस्थीं दीक्षाशोधयेत् संहितायां विष्णुवेष्णयनदं दुसं

2 क्रांत्यां दमनोत्सवे दीक्षा कार्या न काल्ले पि पवित्रे गुरुपर्वणि आगमे च सत्तीर्थे के विधु॰

ग्रासे पुण्यारण्य वने बुध पुण्य क्षेत्रे कुरुक्षेत्रे देवीपीठ चतुष्टये प्रयागे श्री गुरो का

श्यां काल्लाकाल्लेन शोधयेत् तत्वसागर संहितानपि तिथ्यं दिना पि दीक्षायां विशिष्टा

वसरं श्रृणु दुर्लभे सद्गुरूणां च सत्कृत्संग उपस्थिते तदनुज्ञा यदा लब्धा स दीक्षा

वसे महान ग्रामे वा यदि वारण्य क्षेत्रे वा यदि वा निशि आगच्छेति गुरुर्देवा यथा दी

क्षा तदा भवेत् तत्वसारे यदैवेच्छा तदा दीक्षा गुरो राज्ञानुरूपतः न तिथि न व्रत हो

मो न स्नानं न जपक्रिया दीक्षायां कारणं किंतु स्वेच्छा वाप्ता गुरौ यदि मुमुक्षु प्रति न

काल्ल नियमः नियानि सर्व पर्वाणि प्रशस्तानि विमुक्तये इति वचनात् वेशंपा

यन संहितायां संध्यागर्जित निर्घोष भूकंपोल्कानिपातनं एतानन्यांश्च दिशान्स्म 2

त्युक्तां च परित्यजेत्॥ इति काम्याः विषयं तद्देवलग्नमिति सामान्यदीक्षाकालः॥ इति दीक्षाकालः
अथ दीक्षां प्रवक्ष्यामि संक्षिप्तां गुरुसंमतां॥ मू[illegible] कृत्वा सर्वतोभद्रेन वं कुंभं विन्यस्य वा सोदकं गं
धपुष्पाभ्यामर्चितं वस्त्रसंयुतं॥ सर्वौषधीपंचरत्नपंचपल्लवसंयुतं॥ ततो देवार्चनं कृत्वा हुने
द्दष्टोत्तरं शतं॥ शिष्य[illegible]लं कृतं विन्यस्य पाग्निमुपवेशयेत् मंत्रितं प्रोक्षणी तोये शातकौंभ
जलैस्तथा॥ मूलमंत्रेणाष्टशतं मंत्रितैरभिषेचयेत्॥ अथ संपादयेन्मंत्रं हस्तं शिरसि न्या
स्य न अं मस्त्रिसप्त तान्दद्यात् तथा शिष्यो वंदयेद्गुरुमिति॥ अत्राप्यशक्तः कश्चिच्चे [illegible] हृदमध्ये
र्य साक्षतं तद्वस्तुनामभिषिच्याथ तान् मूलेन केकरं॥ निध्याया थ जपेत्कर्णे उपदेशो लयं वि
धिः॥ उपदेशस्तु ध्यायां तु॥ चंद्रसूर्यग्रहे चैव सिद्धिक्षेत्रे सुरालये॥ मंत्रमात्रप्रकथनं उपदेशः
स उच्यते इति॥ शिवः अदीक्षा ये वै कुर्वंति जपपूजादिकां क्रियां॥ निःफलं तस्य विधेते तेषां शिलाया
मुप्तबीजवत्॥ उपदेशानंतरं गुरुः कृत्यं दत्वा शिष्याय मनुं न्यस्याय गुरुः॥ कृतात्म यजनवि
धिः॥ अष्टोत्तरसहस्रं स्वशक्तिहीनाय वा दापयज्जप्यादिति॥ अकुंठितसामर्थ्याय जपेदित्यर्थः॥
मंत्रग्रहणानंतरं शिष्यः कृत्वा अष्टोत्तरशतं शिष्यः प्रजपेद्गुरुर्लोकोदितः॥ अष्टाविंशतिवारं वा[illegible]

मा

कृत्वोपवा जपेत्॥ ततोजातमंत्रः स्वमंत्रप्रदायप्रदद्यात्ततो दक्षिणां स्वशक्त्या तदावर्कैलं वदंति २१
तथा नारदीये॥ आचार्याद्दनमिप्राप्य मंत्रश्चाद्दनदक्षिणाः॥ अभ्यस्तोपि सदा मंत्रः श्रेयसे नावकल्पते के
3 तंत्रे चोक्तं संग्रहे॥ नगृहीज्ञानमात्रेण परत्रेह च मंगलं॥ प्राप्नोति चेद्गुरुवदनेदानहोमादिभिर्विना
गृहस्थो यद्विदानाद्दिद्यान्नजुहुयादपि॥ पूजयेद्विधिनानैव कः कुर्याच्चदनुग्रहमिति॥ गृहस्थाव
षयाणि वाक्यानि द्विविधं तु लक्षुमनोवांछां तरमुपासनं न्यासिनां चांतरं प्रोक्तमन्येषामुभयं तत
था॥ यतिभिर्भाविर्तैद्रव्यैः पूज्यो हरिर्गुरुस्तदा॥ संपादितैर्गृहस्थैस्तु स एव क्रममुच्यति॥ अन्येषा
मित्यनेन ब्रह्मचार्यादीनां द्विविधमुपासनमिति॥ अन्यदपि प्रणवाक्षरप्राणायाममंत्रा आग्नेयाः
द्वंद्वमन्त्राक्षरप्राया मंत्राः सौम्याः सूर्ये वहति आग्नेयानां प्रबोधकालः॥ चंद्रे सौम्यानां सुप्र
बोधकाले मंत्रग्रहणं जपेच्च कृते तात्कालिकी सिद्धिः स्यादेवेति॥ ग्रंथांतरे चिकीर्षुर्दैवतोपा
स्तिमादौ भावं विचारयेत्॥ स्नानसंध्यादिकं कृत्वा स्मृत्वा हरिपदांबुजं शयीत कुशशय्यायां प्रार्थ
येच्च वृषध्वजं भगवन्देवदेवेश शूलभृद्वृषवाहन॥ इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वतं
नमोऽजय त्रिनेत्राय पिंगलाय महात्मने भीमाय विश्वमुख्याय स्वप्नाधिपतये नमः॥ स्वप्नेक

थर्यमेतत्थं सर्वकार्यमशेषतः॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वरः॥ एभिर्मंत्रैः शिवमा
र्घ्यनिद्रां कुर्यान्निराकुलः॥ स मद्दृष्टं निशि प्रातः गुरवेपि निवेशयेत्॥ त संतरेण मंत्रज्ञः स्वयं चैव वि
चारयेत्॥ इति शैवमाधवपाठकाग्निहोत्रिसुत शैवगोपीनाथपाठकाग्निहोत्रिविरचिते पुरश्चर
णविधौ संक्षेपदीक्षाविधिः॥ अथ गुरुशिष्ययोश्च परीक्षा प्रोच्यते मया॥ गुरुशिष्यावुभौ मोहाद
परीक्ष्य परस्परं॥ अज्ञानाच्छ्रीयोपदेशं तु योगकृज्जातिदद्दाति च । भुंजेते ताउभौ घोरान् नरकानेकविंशति
अनर्हे मंत्रविज्ञानं न कुर्वीत कदाचन॥ तस्मात्सरीक्ष्य वे रूप्यमन्यथा निःफलं भवेत्॥ यः स्नेहभ
यलोभाद्यैरयोग्यं यदि दीक्षयेत्॥ देवताशापमाप्नोति कृतं च निःफलं भवेत्॥ ज्ञानेन क्रियया वा
पि गुरुः शिष्यं परीक्षयेत्॥ संवत्सरं तदर्धं वा तदर्धं वा प्रयत्नतः॥ शिष्योपि लक्षणैरेतैः कुर्याद्गुरुपरी
क्षणं॥ आनंदाद्यैर्जपैः स्तोत्रैर्ध्यानहोमार्चनादिभिः॥ ज्ञानोपदेशसामर्थ्यं मंत्रस्फुद्धिमयीश्वरि॥ बो
धकत्वं च विज्ञाय शिष्यो भूयान्न चान्यथा॥ गोविंदार्चनसुधापांसगुणभजनवत्मीभ्वाश्रमाचार
रूढः॥ श्रवणमननमंत्री सद्गुरुः कौ शोभः॥ स्फुरदमृतविदात्मा ब्रह्मरूपो महात्मा भवसमरजिता
रिः योगिसजो गुरुः स्यात्॥ आगमे॥ गुरुर्नहस्तएवैको न कदाचित्प्रयति गुरुः अयमेव यतीनां स्या

पतिर्गुरुर्यथा पिता ॥ केवलं कामिपरोयमुत्तमः ॥ तथा च ॥ सूतसंहितायां ॥ उत्तमः पंचधा प्रोक्तो गुरुर्वे
लो सुवेदिभिः ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ॥ अतिवर्णाश्रमी चेति क्रमश्श्रेष्ठा विचक्ष
णा ॥ कुलार्णवे च ॥ श्रीगुरुः परमेशानि शुद्धवेशो मनोहरः ॥ सर्वलक्षणसंपन्नः सर्वावयवशोभितः
अग्रगण्यो गभीरश्च पात्रापात्रविशेषवित् ॥ शिवविष्णुः समः साधुनं च दर्शनदूषकः ॥ नित्यनैमित्ति
ककाम्येरतः कर्मण्यनिंदिते ॥ यदृच्छालाभसंतुष्टो गुणदोषविभेदकः ॥ इत्यादिलक्षणोपेतः श्रीगु
रुः कथितः प्रिये ॥ अत्रिनेत्रः शिवः साक्षाद् चतुर्बाहुर् अच्युतः ॥ अचतुर्वदनो ब्रह्मा श्रीगुरुः कथितः
प्रिये ॥ तथा च ॥ ज्ञानोलये ॥ निंदितस्तु भिनत्तु मंत्रं तथा नानामहस्य च ॥ लोदरस्य कनिष्ठस्य वैरि
पक्षाश्रितस्य च ॥ न नुश्रीदत्तेन मलच्छेवसि ह्यादीनेव शोधयेदित्यनेन स्त्रीणामपि आचार्य
त्वं प्राप्तं संत्वं ॥ किंतु स्वमदेव नाशानात्स्त्रीतः प्राप्तेन द्विषयः भिदं वचः ॥ स्त्रीशूद्राणां साक्षात् आचा
र्यत्वस्य निषेधात् ॥ तथा चोक्तं स्मृत्यः शूद्राद्यः अपि बोधयेयुर्हिताहितं ॥ यथार्हं माननीयाश्च ना ४
र्हं स्याचार्यतां क्वचित् ॥ शूद्रान्नं शूद्रसंपर्कः शूद्रेण व सहासनं ॥ शूद्राज्ज्ञानागमः कश्चिज्ज्वलंतमपि
वपातयेत् ॥ सूतसंहितामपि ॥ शूद्राणां च तथा स्त्रीणां गुरुत्वं न कदाचनेति ॥ योग्यमाचं गुरुं स्व

कोशिष्यः शूद्रं कि पाविदं गुरुं समाश्रयेदन्यं यः प्रयाति स दुर्गतिं॥ इति गुरुपक्षौरे॥ नास्तिकानभिन्नम
पादानुकृतघ्नान्वेदनिंदकान्॥ मंत्रासरोपदेशो तु दूरतः परिवर्जयेत्॥ सनकुमारस्य॥ न देयमर्पलक्ष
यपिसुनायास्थिराय च॥ भक्तिश्रद्धाविहीनाय शुश्रूषाविमुखाय च॥ कुलार्णवे तस्य शिवभक्तस्य
हितप्रियकरस्य च॥ शूद्रस्यापि प्रदातव्यं नमोंतं प्रणवं विना॥ विना प्रणवेन मंत्रः॥ स्त्रीशूद्राणां प्रसाद
कः॥ प्रणवेन समायुक्तस्तपो देवी विरोपमः॥ आगमेपि स्वाहाप्रणवसंयुक्तं मंत्रं शूद्रे वदन्नद्विजः शूद्र
त्वं गच्छतामेति विप्रः शूद्रत्वमेव हि॥ त्रैवर्णिकाय शुद्धाय स्वधर्मनिरताय च॥ मंत्रचिंतामणिर्देवो व
कुलाय प्रियाय च॥ स्वशिष्याय स्वभक्ताय यज्ज्ञानमुपदिश्यते॥ तत्प्रयाति पवित्रत्वं गोक्षीरं स्वादुतामि
व॥ अशिष्येष्वस्वभक्तेषु यज्ज्ञानमुपदिश्यते॥ तत्प्रयाति पवित्रत्वं गोक्षीरं स्वादुतामिव॥ अमात्यदोषो
राजानं भार्यादोषः पतिं यथा॥ तथा शिष्यकृतो दोषो गुरुं प्राप्नोत्यसंशयं॥ तस्माच्छिष्यं गुरुर्नित्यं परीक्षे
व परिग्रहेत्॥ इति शिष्यपरीक्षा॥ अथ दशसंस्कारस्य मंत्राणां प्रोच्यते मया॥ कर्मण्यपि यदा मंत्रा
मंत्रिणा योजिता अपि॥ तस्मात्तद्दोषनाशाय कर्तव्याः संस्कारा दश॥ तथा च शारदातिलके॥ मंत्रा
णामपि संस्काराः कथ्यंते सिद्धिदायिनः॥ जननं जीवनं पश्चात्ताडनं बोधनं तथा॥ अथाभिषेको विमली

द्वि

4

करणंप्यायनेपुनः॥ तर्पणंदीपनंगुप्तिःश्चैतास्तुमंत्रसंस्क्रियाः॥ तास्त्वयथा॥ मंत्राणांमातृकामध्यादुद्धा
5 रोजननंस्मृतं॥ प्रणवांतरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः॥ एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः॥ मं
त्रवर्णान्समालिख्यताडयेच्चंदनांभसा॥ प्रत्येकंवायुनामंत्रीताडनंतदुदाहृतं॥ विलिख्यमंत्रंतन्मं
त्रोप्रसूनैःकरवीरजैः॥ तन्मंत्राक्षरसंख्यातैर्हन्यात्तेनबोधनं॥ स्वतंत्रोक्तविधानेनमंत्रीमंत्रार्णसं
ख्यया॥ अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये॥ संचिंत्यमनसामंत्रंज्योतिर्मंत्रेणनिर्दहेत्॥ मंत्रेम
लत्रयंमंत्रीविमलीकरणंत्विदं॥ तारंव्योमाग्निमनुयुक्दंडीज्योतिर्मनुर्मतः॥ कुशोदकेनजप्तेनप्रत्य
र्णंप्रोक्षणंमनोः॥ तेनमंत्रेणविधिवदेतदाप्यायनंमतं॥ मंत्रेणवारिणामंत्रेतर्पणंस्मृतं॥ तारमाया
रमायोगोमनोर्दीपनमुच्यते॥ जप्यमानस्यमंत्रस्यगोपनंत्वप्रकाशनं॥ संस्कारादशचप्रोक्ताःसर्व
तंत्रेषुगोपिताः॥ यान्कृत्वासंप्रदायेनमंत्रीवांछितमश्नुते॥ एवंदशसंस्काराः॥ तांबूलेवाभूर्जपत्रे
लिखितंमंत्रंवाकृत्वाकर्तव्याः॥ इतिदशसंस्काराः॥ अथसिद्धादिविचारः॥ सिद्धःसिध्यतिकालेनसाध्य
स्तुजपहोमतः॥ सुसिद्धोग्रहमात्रेण अरिर्मूलंनिकृंतति॥ तथाचोक्तं॥ मालतीविजये॥ द्वादशारेत
थाचक्रेकूटषंढविवर्जितान्॥ आदिहांतांलिखेद्वर्णान्पूर्वतोयावदीश्वरि॥ अंकानेकादिद्वादशांतंलि

खेस्तूर्वादितः क्रमात्॥ सिद्धः साध्यः सुसिद्धारिश्चतुर्णां तु स्फुटी भवेत्॥ मंत्रसाधकयोराद्यो वर्णः
स्यात्सत्र कोष्ठके स एव सततं स्मृतः स्ववर्णस्वरभेदतः नवैकपंचमे सिद्धः साध्यः षट्दशयुग्मके त्रिस
प्तैकादशे शमित्रे वेदाष्टद्वादशे रिपुः॥ इत्यकडमचक्रं॥ एकाक्षरे तथा कूटे त्रैपुरे मंत्रनायके॥ स्त्रीदत्ते
स्वप्ने लब्धे च सिद्धादीन्नैव शोधयेत्॥ मंत्रसिद्धोपदिष्टेषु वसुरात्मायजेषु च मालामंत्रे स्वप्रिये चासि
द्धादीन्नैव शोधयेत्॥ एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत्॥ एषु दोषेषु सर्वत्र मायां कामम
थापि वा॥ क्षिप्त्वा त्वादौ स्त्रियं दद्यात्सर्वदोषमिति श्रुतः ये॥ प्रणवो भुवनेशानी रमाबीजं मनोभवं॥ जी
वनं सर्वमंत्राणां मिसाहं भगवान् शिवः॥ लुप्तबीजाश्च ये मंत्रा गोपालस्य क्वचित् क्वचित्॥ कामबीजं
मुखं तेषां दद्यात्सर्वार्थसिद्धये॥ श्रीबीजाद्यं यदा जप्यात्तदा लक्ष्मीरचंचला॥ कामाद्यं जपनादेव सर्व
लोकवशं नयेत्॥ मायादिजपनादेव वाचितद्विजोयते विरात्॥ शक्तिबीजादिको मंत्रो निर्वाणमचिरा
दिशेत्॥ पुटनात्प्रणवाभ्यां तु मोक्षमाप्नोति निश्चितं॥ एवं मंत्रवरं जप्त्वा किं न साध्यति मंत्रवित्॥
इति जरिमंत्रो गृहीतश्चेद्दशानवशातस्य तत्॥ तस्य त्यागः प्रकर्तव्यः तत्प्रकारो हि नोच्यते॥ सुदिने
स्थापयेत्कुंभं सर्वतोभद्रमंडले॥ विलोमं स्वं जपेन्मंत्रं पूरयेत्तं सुपायसात् तत्र देवं समावाह्य जपेदावर

णान्वितां॥ तदग्रे स्थंडिलं कृत्वा प्रतिष्ठाप्यानलं ततः॥ जुहुयान्मूलमंत्रेण विलोमेन शतं च ते॥ दि
क्पतिभ्यो बलिं दद्यात् पायसान्नैर्घृतान्वितैः॥ पुनः संपूज्य देवेशं प्रार्थयेन्मनुनामुना॥ अनुकूल्यम
6 नालोच्य मया तरलबुद्धिना॥ यद्रुपानं पूजितं च प्रभो मंत्रस्वरूपकं॥ तेन मे [illegible]न सः क्षोभमशेषं
विनिवर्त्तय॥ पापं प्रतिहतं चास्तु भूयाच्छ्रेयः सनातनं॥ ततोनुमम कल्याणं पावनी भक्तिरस्तु
मे॥ एवं संप्रार्थ्य देवेशं कर्पूरागरुचंदनैः विलोमं विलिखेत्॥ मंत्रं ताडपत्रे तदर्चयेत्॥ प्रवध्यानु
निजे मूर्ध्नि स्नापयेत् कुंभस्थितैर्जलैः॥ पुनः संपूर्य तत्तोयेन पश्ये मंत्रयंत्रकं॥ संपूज्य कुंभं सरिति तडागे
वा विनिक्षिपेत्॥ विप्रान् संभोज्य मुच्येत पीडया सो मंथयत्॥ इति सिद्धादिविचारः॥ ऋणसिद्धादियो
गेषु मंत्रदाने विशेषतः॥ प्रसिद्धं नाम गृह्णीयात्सुप्तो येन आगते॥ नामाद्यक्षरमारभ्य या
वन्मंत्रादिवर्णकं॥ त्रिधा कृत्वा स्वरैर्विधात तदन्यद्विपरीतकं॥ कृत्वाधिको ऋणी सेयो ऋणी चे
न्मंत्रमुत्तमं॥ स्वयं ऋणी चेन्मंत्रं त्यजेत्पूर्वं ऋणी यतः॥ प्रकारांतरेणापि॥ साध्यसाधकनामा
द्यः॥ साधकस्य तु पष्ठतः॥ अष्टभिस्तु हरेद्भागं शेषं ऋणाधनं भवेत्॥ इति ऋणधनसाधनं॥ ६
अथ जपस्थानानि॥ नारदीये॥ शिवस्य सन्निधाने च सूर्याग्न्योर्वा गुरोरपि॥ दीपस्य ज्वलित

स्यापि जपकर्म प्रशस्यते॥ तथा च शिवः॥ गृहे जपं समं विद्यात् गोष्ठे शतगुणं भवेत्॥ नद्यां शतसहस्रं
स्यादनंतं शिवसन्निधौ॥ समुद्रतीरे ह्रदे च गिरौ देवालयेषु च॥ पुण्याश्रमेषु सर्वेषु जपे कोटिगुणं भ
वेत्॥ तत्पूर्वाभिमुखो वा स्याद्दक्षिणे चाभिचारिकं॥ पश्चिमे धनदं विद्यादुत्तरं शांतिदं भवेत्॥ अन्य
श्च॥ अग्नेः पृष्ठे तथा वामे समीपे गर्भमंदिरे॥ जपेत्प्रदक्षिणे होमं न कुर्याद्धि शिवालये॥ इत्यादि जपस्था
नानि॥ इत्यादिस्थानमाश्रित्य दीपस्थानं विचिंतयेत्॥ कूर्मस्यैव मुखं विद्धि दीपस्थानं सुसिद्धिदं॥
तद्यथा॥ चतुरस्रां भुवं भित्वा कोष्ठानां नवकं लिखेत्॥ पूर्वकोष्ठादिवालिखेत्सप्तवर्गाननुक्रमात्॥
लक्षावीशो मध्यकोष्ठे स्वरान्युग्मक्रमाल्लिखेत्॥ दिक्षु पूर्वादितो यत्र ग्रामः स्याद्यक्षरं भवेत्॥ मुखं
ततस्य जानीयाद्दस्तौ तु भयतः॥ स्थितो कोष्ठे कुक्षौ उभौ पादौ द्विशि पृष्ठं पक्षमीरितं॥ कूर्मचक्रमिदं
प्रोक्तं मंत्राणां सिद्धसाधनं॥ मुखस्थो लभते सिद्धिं करस्थः सर्वभोगवान्॥ कुक्षिस्थितः शुभासी
नः पादस्थो दुःखमाप्नुयात्॥ पुच्छस्थितो वध्यं बंधं जपादाप्नोति निश्चितं॥ दीपस्थानं ततः क्षेत्रे कृत्वा
मंत्री शुचिर्जपेत्॥ क्षेत्रसाधकमंत्राणां एकमेवाद्यमक्षरं॥ यदि स्यात्स ध्रुवं मंत्रसिद्धिमेव प्रसिद्ध
ति॥ ग्रंथांतरे॥ युग्मं स्वराणां विलिखेत्पूर्वकादीश्च वर्गान्क्रमशः क्षमीशो॥ स्थानाधिपस्यास्त

८

रमस्ति यत्र तद्दीपदेशं मुनयो वदंति ॥ इति दीपचक्रं ॥ अथासनविचारः वंशाश्मधरणीदारु
तृणपल्लवनिर्मितं ॥ वर्जयेदासनं धीमान् दारिद्र्यव्याधिदुःखदं ॥ तूलकंबलवस्त्राणि पट्टव्याघ्रमृ
गाजिनं ॥ वर्जयेदासनं धीमान् सौभाग्यज्ञानसिद्धिदं ॥ वंशासने दरिद्रत्वं पाषाणे व्याधिसंभवः
धरण्यां स्याद्दुःखभूतिर्दौर्भाग्यं दारुकासने ॥ तृणासने यशोहानिः पल्लवे चित्तविभ्रमः ॥ कृष्णा
जिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ॥ स्यात्पौष्टिकं च कौशेयं शांतिकं वेत्रविष्टरं ॥ वाशास
ने व्याधिनाशः कंबले दुःखमोचनं ॥ स्यादाभिचारकं नीले रक्ते वश्यादिकं भवेत् ॥ धवले शां
तिकं मोक्षः सर्वार्थश्चित्रकंबले ॥ सर्वाभावे त्वासनार्थं कुशविष्टरमिष्यते ॥ इत्यासनानि ॥ अ
थ जपमालामंत्रखंडे ॥ स्फाटिकी मौक्तिकी वापि प्रोतव्या सितसूत्रकैः ॥ सर्वकर्मप्रसिद्ध्यर्थं जपे
द्रुद्राक्षमालया ॥ धर्मार्थकाममोक्षार्थं जपे पद्माक्षमालया ॥ अरिष्टपुत्रजीवैश्च शंखपद्मै
र्मणिस्तथा ॥ कुशग्रंथिश्च रुद्राक्ष उत्तमं चोत्तरोत्तरं ॥ अन्यत्रापि रुद्राक्षस्त्वेत पद्माक्षमाले तु
अखिले जपे ॥ अतिस्थूलोतिसूक्ष्मश्च स्फुटितो भंगुरोल्पक्षुद्राभिनतः पुराध्वतो जीर्णो रुद्राक्षो नव
रः स्मृतः ॥ उत्तमं वा ॥ अन्यामे जपमालायाः करशाखासु पर्वभिः ॥ मध्यांगुल्यग्रपर्वादि प्राद

क्षिप्राक्रमेणतु॥अनामिकायायोमध्यतस्मादधः क्रमेणतु॥तर्जन्यादौजपांतश्चअक्षमालाक
रेस्थिता॥अंगुल्यग्रेषुतन्नजपंयज्जपंमेरुलंघने॥असंख्यानतुयज्जप्तंतत्सर्वंनिष्फलंभवेत्॥म
ध्यमायाद्वयंपर्वजपकालेतुवर्जयेत्॥पर्वमेरुंविजानीयात्तस्मात्वमरिवर्जयेत्॥अथवाकरशाभिः
कर्तव्योजापकैर्जपः अंगुल्याजपसंख्यानंएकमेकमुदाहृतं॥रेषयाष्टगुणंविंद्यात्पुत्रजीवैर्दश
स्मृतं॥शतंचंदनशंखैश्चप्रवालैस्तुसहस्रकं॥स्फाटिकैर्द्दशसाहस्रंमौक्तिकैर्लक्षमेवचा।
दशलक्षंराजतैश्चैःसौवर्णैःकोटिरुच्यते॥कुशग्रंथ्याचरुद्राक्षैरनंतगुणितंभवेत्॥अष्टोत्तर
शतैर्मालापंचाद्यैशैतुराधिके॥सप्तविंशतिभिःकार्याएकत्रीवासमेरुका॥मुखंमुखेनसंयो
ज्यपुछंपुछेनयोजयेत्॥प्रोतव्यासितसूत्रेणसत्कर्मफलसिद्धये॥पट्टसूत्रकृतामालादेव्याःप्री
तिकरीमताः॥कार्पासेवोत्तमवीमालापद्मसूत्रैरथापिवा॥उर्णाभिर्वल्कलैर्वापिशैवीमालाप्रकी
र्तिता॥कार्पाससूत्रैरन्येषांविदध्याजपमालिकेति॥कामलायांविशेषःत्रिंशद्भिःस्याद्धनंपुष्टिः
सप्तविंशतिभिर्भवेत्॥पंचविंशतिभिर्मोक्षेपंचदश्याभिचारके॥पंचाशद्भिःकृतेशानिसर्वा
सिद्धिरुदीरिता॥श्रीशिवज्ञानविज्ञायामपि॥अंगुष्ठंमोक्षदंविद्यात्तर्जनीशत्रुनाशिनी॥मध्य

मायाध्यनदा शांतिकरी त्वेशास्तनामिका॥ कनिष्ठाकर्षणे शस्ता जपकर्मणि शोभने अंगुष्ठेन ज
पं जप्यमन्यैरंगुलिभिः सह॥ अंगुष्ठेन विना कर्म कृतं तदफलं भवेत्॥ मोक्षार्थं पंचविंशत्या सप्ताविं
शति पोष्टिके॥ त्रिंशत्स्यधनसंपत्त्यैः पंचदश्याभिचारके॥ जप्याक्षमालां संकल्पामामयेदाशिषाम
पि॥ प्रदक्षिणं पुनर्वक्त्रं प्रारभ्येवं समाचरेत्॥ स्वयं वामेन हस्तेन जपमाला न संस्पृशेत्॥ अदीक्षितो
द्विजो वापि स्पृष्टश्चेच्छुद्धिमाचरेत्॥ न धारयेत्करे मूर्द्धि कंठे व जपमालिकां॥ जपकाले जपं कृत्वा सदा
शुद्धस्थले क्षिपेत्॥ गुरुं प्रकाशयेद्धीमान्मंत्रं नैव प्रकाशयेत्॥ अक्षमालां च मुद्रां च गुरोरपि न दर्श
येत्॥ अन्यथा॥ कंपनात्सिद्धिहानिः स्याद्धूननं बहुदुःखकृत्॥ शब्दे जाते भवेद्रोगो करभ्रष्टा विना
शकृत्॥ छिन्ने सूत्रे भवेन्मृत्युस्तस्मात् यत्नपरो भवेत्॥ जपांते कर्णदेशे वा उच्चस्थाने थवान्यसेत्॥
अक्षमाला हि या प्रोक्ता कल्पिता कल्पितेति च॥ कल्पिता मणिभिः कृत्वा मातृकास्याद कल्पिता॥ आ
दिक्षांताक्षरैः प्रोक्ता माला वर्णमयी बुधैः॥ अनुलोमविलोमाभ्यां गणयेन्मंत्रवित्तमः॥ जपमालां
विधायेत्थं ततः संस्कारमाचरेत्॥ क्षालयेत्पंचगव्येन सद्योजातेन सज्जलैः॥ चंदनागुरुगंधाद्यैर्वा
मदेवेन घर्षयेत्॥ धूपयेत्ताम घोरेण लेपयेत्पुरुषेण तु॥ मंत्रयेत्पंचमेनैव प्रत्येकं तु शतं शतं॥ मे

रुं चपंचमेनैव तथा मंत्रेण मंत्रयेत्॥ प्रक्षाल्य पंचगव्येन तथा पंचामृतेन च॥ संस्थाप्य पंचगव्येन
शिवकुंभस्थितेन च॥ येन प्रतिष्ठिता माला तन्मे वतु मनुं जपेत्॥ अन्यमंत्रजपं विद्वान्न कुर्यात्कर्हि
चिद्बुधैः रिति॥ प्रकारांतरे॥ ईश्वरउवाच॥ वक्ष्ये नामयसंस्कारं यथाविधि समाचरेत्॥ प्रक्षाल्य पंच
गव्येन तथा पंचामृतेन च॥ संस्थाप्य पंचगव्येन शिवकुंभस्थितेन च॥ सर्वं वै मूलमंत्रेण गंध
पुष्पाक्षतादिभिः॥ धूपदीपनैवेद्यादि दत्वा चाष्टशतं स्पृशेत्॥ मूलमंत्रं जपेत्पश्चाद्दंडवत्प्रणमे
द्बुधः॥ एवं या संस्कृता माला जपकर्मणि सर्वदा॥ अभीष्टफलदा स्यात्सा सर्वपापविनाशिनी॥
मध्यमानामिकांगुष्ठैः रक्षमालामणीशते॥ एवं जपस्य चैकस्य क्रमोयं चालयेज्जपेत्॥ अंगुष्ठेन
तु मोक्षाय मध्यपुर्विवर्द्धये॥ जपेदनामिकांगुष्ठेनैतराभ्यां कदाचन॥ इति ग्रंथांतरे तु॥ अंगुष्ठमध्य
मायोगात्सर्वसिद्धिप्रदायिनीति॥ इत्यक्षमाला॥ अथ भक्ष्याभक्ष्यविचारः॥ तथा च गौतमीये॥
चरु मूलफलक्षीरदधिभिक्षान्नसक्तवः॥ शाकश्चाष्टविधं चान्नं साधकस्योच्यते बुधैः॥ तदपि
प्रशस्तं नात्युष्णं न चोच्छिष्टं न चाधिकं॥ तदुक्तं नारदीये॥ षडकोसंसुपक्वं च कुर्याद्दलप्रभोज
नं॥ नेंद्रियाणां विकारं स्यात् तथा भुंजीत साधकः॥ यद्वा तद्वा परित्याज्यं तु षष्ठांकुत्सितं तथा
प्रशस्तान्नं समश्नीयान्मंत्रसिद्धिमयीहया॥ पयोव्रते तु विशेषः॥ पयोव्रतस्य सिद्धिः स्यात्सेनै

वनसंशयः॥ शाकमैक्ष्य हविष्याशीकमौलक्ष जपेत्॥ भिक्षान्नं तु न गृहिणः॥ यतिश्च ब्रह्मचारी
च भिक्षान्नजीविनौ मतौ॥ सर्वधर्मबहिर्भूतो गृही भिक्षान्नजीविनः॥ इति भक्ष्याभक्ष्यविचारः॥ अथ नि
यमः॥ लवणं पललं चैव क्षारं क्षौद्र रसान्तरं॥ माषमुद्गमसूरांश्च कोद्रवांश्चणकानपि॥ असद्भाषण
मन्यापं वर्जयेदन्यपूजनं॥ विनाश्रमोचितं नित्यमथ नैमित्तिकं च यत्॥ स्त्रीशूद्रपतितव्रात्यनास्ति
कोच्छिष्टभाषणं॥ असत्यभाषणं चैव कौटिल्यं च परित्यजेत्॥ सद्भिरपि न भाषेत जपहोमार्चनादि
षु॥ वाग्यजः कर्म निर्वर्त्य निस्पृहो वनितादिषु॥ वर्जयेत्क्षितकाव्यादिश्रवणं नित्यदर्शनं॥ तांबूल
गंधलेपं च पुष्पधारणमेव च॥ मैथुनं तत्कथालापं तद्गोष्ठीं परिवर्जयेत्॥ कौटिल्यं क्षौद्रमभ्यंग
मनिवेदितभोजनं॥ असंकल्पितकृत्यं च वर्जयेन्मर्दनादिकं॥ स्नायाच्च पंचगव्येन केवलामलके
न वा॥ श्रुतिस्मृतिपुराणोक्तैर्मंत्रैः स्नायादनंतरं॥ स्नानं त्रिषवणं प्रोक्तमशक्तो द्विः शक्ततया॥
अस्नातस्य फलं नास्ति न चातर्पयतः पितॄन्॥ स्वजप्यमंत्रेण तु कुंभमुद्रया निमज्जनस्यानुपदेस्व
मस्तके॥ सप्ताष्टविंशत्यभिषेकमाचरेत्॥ तथाष्टजप्ताचमनं च संततमिति॥ इति श्रीशैवमाधवपा
ठकाग्निहोत्रिसुतशैवगोपनाथपाठकाग्निहोत्रिविरचिते पुरश्चर्याविधौ गुरुशिष्यपरीक्षादिः
सर्वविधिः॥ अथ जपविधानं॥ तत्र शुभे दिने नदीपर्वतमस्तकादौ क्षेत्रं परिकल्प्य क्षेत्रपालपूजां
विधाय पूर्वोक्तदीपस्थानमाश्रित्य जपमारभेत्॥ तथा च कौर्मे॥ अद्रयः पर्वताः पुण्या नद्यस्तीरा

णि यानि च ॥ सर्वाण्येश्वामिकान्याहुर्नेहितेषु परिग्रहः ॥ ततोस्यत्र भूग्रहं कुर्यात् तत्तदुक्तं ग्रंथांतरे ॥ एवं पूर्व
समीरितेन विधिना शासनात् स्वयं सादरं संपाद्याखिलसाधनानि विधिवत् श्रीसद्गुरोराज्ञया जातः स्वस्य
पुनः स्नातः ॥ स्वविहितो देशासने भूग्रहं कुर्यान्मंत्रमुद्दिश्य जिनितमतानुष्ठानहेतोर्वशी ॥ गृहीतस्यास्य मं
त्रस्य पुरश्चरणेन सिद्धये ॥ ममेयं गृह्यते भूमिर्मंत्रोयं सिद्धतामिति ॥ मंत्रेण । ततो ज्ञाताज्ञातपापक्षयार्थं सह
स्रपंचकं त्रयं वाष्टोत्तरसहस्रं वा गायत्रीं जपित्वा ब्राह्मणभोजनादिनाभ्यर्च्य गुरुं च वस्त्रालंकारादिभिः ॥
ततो हविष्यान्नेनैव भोजनं कुर्यात् ॥ कस्यचिन्मते उपवासं कुर्यात् ॥ उक्तं च सनत्कुमारकल्पे ॥ विप्रान्संतर्प
येदन्नभोजनाच्छादनादिभिः ॥ बहुभिर्वस्त्रभूषाभिः प्रणमेद्गुरुमात्मनः ॥ आरंभे च जपं पश्चात्तदनुज्ञापुरः
सरमिति पूर्वदिनकृत्यं ततो जपारंभदिने स्नानादिकं विधाय दीपस्थानेनत्वासनविधिं च संपाद्य संकल्पं
कुर्यात् ॥ स यथा । अद्येत्यादि पंचांगं स्मृत्वा अमुकाक्षरा अमुकमंत्रस्य सिद्धिकामोऽमुकसंख्याजपदशांश
होमतर्पणाभिषेकात्मकपुरश्चरणमहं करिष्ये इति संकल्प्य अमुकमंत्रस्यामुकऋषिः अमुकछंदः अमुक
देवता पुरश्चरणजपे विनियोगः ॥ इत्युक्त्वा ऋष्यादिन्यासान् ध्यानं च कृत्वा ॥ त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा म
ता ॥ तेन सत्येन मे सिद्धिं मातर्देहि नमोस्तु ते ॥ इति जपमालां प्रार्थ्य हस्ते कृत्वा देवोहमिति भावयित्वा जपमा
रभेदिति । पुरश्चरणजपे दिवसातिक्रमो न कर्तव्यः जपस्तु प्रत्यहं नन्यूनो नाधिको न त्वरया कार्यः ॥ उक्तं च
नारदीये । नैरंतर्यविधिः प्रोक्तो न दिनं व्यतिलंघयेत् । दिवसातिक्रमे तेषां सिद्धिरोधः प्रजायते । शनैः श
नैरतिस्पष्टं न द्रुतं न विलंबितं ॥ न न्यूनं नातिरिक्तं वा जपं कुर्याद्दिने दिने । मध्यादिनावधिश्च उक्तं च विश्वं

ङ्किकायां शिखाबद्धश्च गुरूणं त्वा जपं कुर्यात्समाहितः॥ उक्तं संस्थापमितं प्रातःकालान्मध्यंदिनावधि॥ मानसः
10 सिद्धिकामानां पुष्टिकामैरुपांशुकः। वाचिको मारणे चैव प्रशस्तो जप ईरितः॥ शयनं दर्भशय्यानां शुचिः प्रय
तमानसः॥ नैकवासा जपेन्मंत्रं बहुवस्त्राकुलो न च॥ गोभिलोपि। नार्द्रवासा जपं कुर्यात् होमं दानं प्रति
ग्रहं॥ सर्वं तद्राक्षसं विद्यात् बहिर्जानु च यत्कृतं॥ न पदा पादमाक्रम्य तथैव हि पदा करौ॥ न चासमाहि
तमना न च वा संश्रयं जपेत्॥ न चंक्रमणश्चैव न पार्श्वमवलोकयन्॥ न प्रावृतो न जल्पंश्च न प्रा
वृतशिरा तथा॥ अशुचिर्दर्शने। उक्तं सनत्कुमारकल्पे। जपकाले यदा पश्येदशुचिं मंत्रवित्तमः॥ प्रा
णायामस्तदा कार्यस्ततः शेषं समाचरेत्॥ यदा चेषभवेन्मंत्री स्वयमप्यशुचिः पुनः॥ आचांतः प्रय
तो भूत्वा न्यासं पूर्ववदाचरेत्॥ मौनेन जपं कुर्यात्। तदुक्तं मंगिरसा संध्ययोरुभयोर्जाप्ये भोजने
दंतधावने॥ पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः॥ गुरूणां सन्निधौ दाने योगे चैव विशेषतः॥
एषु मौनं समातिष्ठन् स्वर्गमाप्नोति मानवः॥ मौनव्रत चारे प्रायश्चित्तं तदुक्तं ग्रंथांतरे॥ सकृदुच्चारि
ते शब्दे प्रणवं समुदीरयेत्। मोहेन मारशब्देपि प्रणवं सकृदुच्चरेत्॥ योगयाज्ञवल्क्यः। यदि वाग्य
मलोपः स्याज्जपादिषु कथंचन॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं। शाकयनोपि। क्षुते निष्ठीव
ने चैव दंतोच्छिष्टे तथानृते। पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत्॥ अग्निरापश्च वेदाश्च सोम
सूर्यानिलस्तथा। सर्वे एते हि विप्रस्य कर्णे तिष्ठंति दक्षिणे। अन्यच्च। जपश्रांतस्तु तं ध्यायेत्

ध्यायेत् ध्यानश्रान्तस्तु तं जपेत्· जपध्यानसमायुक्तो मंत्री सिद्ध्यति नान्यथेति· अथ पुरश्चरणस्वरूपमु
च्यते· पूजा त्रैकालिकी नित्यं जपतर्पणमेव च॥ होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते· कुलार्णवे च· पंचा
ङ्गानि महादेवि जपहोमश्च तर्पणं· स्वाभिषेकश्च विप्राणां माराधनमपीश्वरि· पूर्वं पूर्वं दशांशेन पुरश्च
रणमुच्यते· सनत्कुमारोपि· होमस्यानियतत्वात्· तर्पयेत् दशांशेन सद्यते न पयोऽम्भसा· कुर्यात् दशांश
तो होमं ततः सिद्धो भवेन्मनुरिति· स्कन्दे· पूजया विपुलं राज्यं अग्निकार्येण संपदः॥ जपेन पापसंशुद्धिर्ध्या
नध्यानेन मुच्यते· वसिष्ठसंहितायां· इषुमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्मणि· क्रियासारे· होमोऽष्टदिक्षु
प्रागवहः प्रागुदकप्रवहोऽथवा· उदग्वहः प्रदेशो वा स्थण्डिलस्य प्रलं स्मृतमिति· पिंगलामते· होमे प्रशस्य
ते कुंडं स्थण्डिलं बहुसन्निभमिति· वायवीयसंहितायां· अथाग्निकार्यं वक्ष्ये कुंडे वा स्थण्डिलेऽपि वा· वेद्यामप्यायस
पात्रे मृन्मये वा नवे शुभे· स्थण्डिलं वा प्रकुर्वीत सुसिद्धैः सिकतैः सितैः इति स्थलं· कुंडे वा स्थण्डिले वापि कुं
डे होमप्रशस्यते· होमो नृविधिना चैव कुर्याद्देशाधिकोत्तमः॥ कुंडं तु नारदेनोक्तं हस्तमात्रं शुभं मतं· अथ
होमकालः॥ वसंतश्चैव पूर्वाह्णे मध्याह्ने ग्रीष्म उच्यते· अपराह्णे भवेद्वर्षाः शरच्चैवार्धरात्रके· उषाहे
मंतर्यैश्चैव संध्यायां शिशिरः स्मृतः॥ ग्रीष्मे उच्चाटनं कुर्यात्स्तंभनं प्रावृषे तथा· शरद्धि शांतिकं कुर्याद्धेमं
ते मोहनं कुरु· शिशिरे मारणं ज्ञेयं वसंते वश्यकर्मणि· रक्तो सिंदूरबालार्ककुंकुमक्षोदसन्निभः॥ वह्नि
वर्णः शुभावहः· भेरी वारिदहस्तीनां ध्वनिर्वह्नेः शुभावहः· नागचंपकपुन्नागपाटलायूथिकानिभः·गं

यो वह्निमुखावहः काकस्वरसुरोर्वह्निर्जपमानस्य दुःखदः ढः ढः स्वगतेर्वर्णो यजमानं विनाशयेत्
एवं दुष्टेषु चिह्नेषु प्रायश्चित्ताय देशिकः मूलेनाज्येन जुहुयात्तं चविंशतिराहुतिः इति वह्निस्वरूपं अथ
होमद्रव्याणि प्रमाणं च कल्पे॰ पलाशपुष्पहोमेन सर्वफलमवाप्नुयात्॰ अश्वत्थस्य समिद्धोमात्प्रा
णः सुस्थिरो भवेत्॰ दूर्वाहोमाद्वाप्नोति दीर्घायुष्यं न संशयः अन्नाज्यहोमादाप्नोति मुनिराज्यं द्वि
जोत्तमः॥ कन्याकामो लभेत्कन्यां लाजाहोमेन सुव्रतः॥ वैराग्यकामो वैराग्यं लभते घृतहोमतः श्रि
यार्थी श्रियमाप्नोति बिल्वपत्रस्य होमतः पुत्रकामो लभेत्पुत्रं जीवपुत्रस्य होमतः आरोग्यका
म आरोग्यं लभते तिलहोमतः॥ यद्यदिच्छति तत्सर्वं लभते पुष्पहोमतः अन्यच्च॰ ये मंत्रजपे च होमे च
संख्या नोक्ता महर्षिभिः॥ तेषामष्टसहस्राणि संख्योक्ता जपहोमयोः यस्मिंस्तु निगदे नैव मंत्रसंख्या
विधीयते॰ तत्र सर्वत्र मंत्राणां वह्नियुगक्रमात् क्रमात्॰ कल्पोक्ता च कृते संख्या त्रेतायां द्विगुणा स्मृ
ता॰ द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा॰ सनत्कुमारेण च तद्यथा॰ स्वाहांते नैव मंत्रेण हो
मकार्यो विजानता॰ नमोंते न नमस्कारो मकारांते न वै जपः लक्षसंख्यं जपेन्मंत्रं ततः सिद्धो भवत्ययं
संन्यासिनां न होमोऽस्ति न वा ब्राह्मणतर्पणं॰ जपमात्रेण संसिद्धिः स्यात्तर्पणाद्विकल्पितमिति॰ तथा
च गौतमीये होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः इतरेषां तु वर्णानां त्रिगुणादि विधीयते॥ कुं

मसंभवस्य॰ यद्यद्दशांगविहीयेत तत्संख्याद्विगुणो जपः कर्तव्यः सांगासिद्ध्यर्थं तद्दशांशकेन भवतीति॰ कश्चित्तु प्रत्य
हं जपदशांशतर्पणमार्जनं करोति कश्चित्तु लक्षे पूर्णे करोत्येव पितामहप्रदायको॰ उक्तं च नारदीये॰ स्वजपस्य
दशांशेन होमं कुर्याद्दिने दिने॰ अथवा लक्षपर्यंते होमः कार्यो विपश्चितेति॰ अनंतरं दशांशतर्पणमार्जनं च
कुर्यात्॰ तत्र वैशंपायनः॰ तर्पणस्य दशांशेन नमोंतं मंत्रमुच्चरेत्॰ अभिषिंचेत्स्वमूर्द्धानं जलैः कुंभास्य
मुद्रया॰ अथ होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च सूकरी॰ शांतिके च मृगी ज्ञेया हंसी पौष्टिककर्मणि॰ सूक
रीत्यभिचारेषु कार्या तंत्रविदुत्तमैः॰ सूकरी करसंकोचः हंसी मुक्तकनिष्ठिका॰ मुक्तकनिष्ठतर्जन्यां मृगी
मुद्रा प्रकीर्त्तिता॰ अभिचारादिहोमेषु सूकरी कथिता बुधैः॰ सूकरी पुत्रकामाय धनकामाय हंसिनी॰ मृ
गी मोक्षे प्रकर्तव्या आहुतिः सर्वकामिका॰ हुतं यन्मुद्रया हीनं तत्सर्वं निःफलं भवेत्॰ अथ संक्षेपपुरश्चरण
विधिः॰ कृष्णाष्टमीं समारभ्य यावत्कृष्णस्य चतुर्दशी॰ देवं ध्यात्वा जपेन्मंत्रमयुतानां चतुष्टयं॰ दशांशं हो
मयेत्पश्चात्तर्पयेत्तर्पयेदभिषेचयेत्॰ ततः सिद्धो भवेन्मंत्रश्चाब्रवीत्कुंभसंभवः॰ तद्यथा॰ पूर्वोक्तमासतिथ्या
दौ अष्टम्यां स्नानादिकं कृत्वा जपस्थाने आसनविधिं च कृत्वा संकल्पं कुर्यात्॰ अद्येत्यादि अमुकाक्षराऽमु
कमंत्रस्य सिद्धिकामोऽयुतचतुष्टयसंख्याकजपदशांशहोमतर्पणाभिषेकात्मकपुरश्चरणमहं करिष्ये
तत्राष्टम्यादिचतुर्दशीपर्यंतं प्रतिदिनं पंचसहस्रं सप्तशत चतुर्दशसंख्याकं चतुर्दश्यां चतुर्दशस्थाने शो
ऽशसंख्याकं जपमहं करिष्ये इति संकल्प्य न्यासादिकं च कृत्वा जपं कुर्यात् जपांते होमादिकं च प्रकारांतरं

उक्तं कुलार्णवे · मंत्री तु प्रजपेन्मंत्रं मातृकाक्षरसंपुटं · क्रमोत्क्रमाच्छजावत्सामासात्सिद्धो भवेन्मनुः मातृका
क्षरसंपुटं · क्रमोत्क्रमाच्छजावत्सामासात्सिद्धो भवेन्मनुः मातृकाजपमात्रेण मंत्राणां कोटिकोटयः सिद्धास्युर्न
च संदेहो यस्मात्सर्वं तदुद्भवमिति · अत्र शतमष्टोत्तरं न्यूनसंख्याव्यवच्छेदकं अष्टोत्तरशतसंख्यं जपेदित्यर्थः
अत्रापि प्रायश्चित्तादिकं कृत्वारंभदिने यद्दिनमारभ्य मासपर्यंतं प्रतिदिनमष्टोत्तरशतसंख्याकं जपमहं करि
ष्ये इति संकल्प्य जपमारभेत् · मातृकोच्चारणं तु सानुस्वारं कुर्यात् तद्यथा · अं आं इं ईं उं ऊं एवं मासपर्यंतं जपं
कृत्वा · मासांते होमादिकं कुर्यात् · एवं पुरश्चरणं भवति · अथवान्यप्रकारेण पुरश्चरणमुच्यते · ग्रहेऽर्कस्यवें
दोर्वा शुचिः पूर्वमुपोषितः नद्यां समुद्रगामिन्यां नाभिमात्रेंभसि स्थितः स्पर्शाद्विमुक्तिपर्यंतं जपेन्मंत्रं समाहि
तः तावत्कालं जपित्वा तु होमादिकं समाचरेत् · इति कुलप्रकाशतंत्रेऽप्युक्तं · पूर्वदिने उपवासमेकभक्तं वा कुर्यात् ॥
कुलार्णवे · अन्नैश्चतुर्विधैर्देवि परार्थैः षड्रसान्वितैः सुभोजितेषु विप्रेषु सर्वं हि सफलं भवेत् · सम्यक्सिद्धै
कमंत्रस्य पंचांगोपासनेन च · सर्वे मंत्राश्च सिद्ध्यंति तत्प्रभावात्कुलेश्वरि · उपदेशस्य सामर्थ्याच्छ्रीगुरोश्च प्रसाद
तः मंत्रप्रभावाद्भक्त्या च मंत्रसिद्धिः प्रजायते यदृच्छया श्रुतं मंत्रं छद्मनापि बलेन वा · प्रेरिते वा गाथादौ यज्जा
पेत्तदनर्थकृत् · पुस्तके लिखितान्मंत्रान्नो लोकप्रजपंति ये · ब्रह्महत्यासमं तेषां पातकं परिकीर्तितं · स्वप्नोपादि
ष्टमंत्रस्य न विधिर्नैव च क्रिया · उपदेष्टृदेवताभ्यां लब्धा जपेच्छुभकरं भवेत् आवाह्य देवतामेकामर्चयित्वान्यदे
वतां · उभाभ्यां लभते शापं मंत्री वंचलमानसः ग्रंथांतरे च · निश्चयोत्साहधैर्यैश्च तत्त्वज्ञानस्य दर्शनात् · अ

ल्पाशी स्यक्तसंगश्च षड्भिर्मंत्रः प्रसिध्यति। अन्यश्च। प्रवासी बहुभक्षी च प्रजल्पी नियमग्रहः॥ नीचसंगश्च
लौल्यं च षड्भिर्मंत्रो न सिध्यति। शिवोपि। मनसंहरणं शौचं मौनं मन्त्रार्थचिंतनं। अव्यग्रत्वमनिर्वेदो जपसिद्धेस्तु
हेतवः॥ गुप्तवीर्याश्चये मंत्रा न दास्यंति फलं प्रिये। मंत्राश्चैतन्यसहिता सर्वसिद्धिकराः स्मृताः। चैतन्यरहिता मं
त्रा प्रोक्ता वर्णास्तु केवलाः॥ फलं नैव प्रयच्छंति लक्षकोटिजपादपि। अथवा देवतारूपं गुरुं ध्यात्वा प्रतोषयेत्। तस्ये
च्छानुसारी स्याद्भक्तियुक्तेन चेतसा॥ गुरुमूलमिदं सर्वं तस्मान्नित्यं गुरुं जपेत्। पुरश्चरणहीनोपि मंत्रसिध्ये
न संशयः। श्रीभवानपि। संतुष्टो हि गुरुर्यस्य तस्य तुष्टं जगत्त्रयं। नास्य साध्यं जगत्यत्र सुप्रसन्ने गुरौ मुने
एवं पुरश्चरणं कृत्वा गुरुं देवतामभिवंद्य वनाद्धिना शुश्रूषया विधां जपेत्। एतत्कर्म परिसमाप्तौ कल्पोक्ता
शालिणान् भोजयित्वा जन्यानि प्रयोजनानि साधयेदिति। श्रीनाथगोपाल महे प्रातो विस्वानंदरूपं परमाश्र
मस्ते। यस्य प्रसादेन तमाश्रिता ये ह्यानंदपूर्णाः प्रभवंति नित्यं। नानाग्रंथान् समालोक्य श्रीमान् गोपीनाथः
कृती॥ पुरश्चर्याविधिं सम्यक् कृत्वा प्यकार्थमचीकरत्॥ इति श्रीम[redacted] परमहंसपरिव्राजकाचार्यश्री गोपालो
श्रयपूज्यपादरूपाकटाक्षासादितपरमानंदैकरसशैवमाधवपाठकाग्निहोत्रिसुत शैवगोपीनाथपा
ठकाग्निहोत्रिविरचितः पुरश्चरणविधिः समाप्ताः॥ देवीयामले। जपादौ वाचनविधिः कार्यो दीक्षाविर्तैर्न
रैः नास्ति पापं यतस्तेषां सूतकं च यतात्मनां। मडानीतंत्रे। मृतके सूतके चैव धूमोक्षारादिके तथा। जपं चा
र्चं तथा कुर्यात्। मंत्रन्यासपुरःसरं। विष्णुयामले। शिवविष्णुर्चने दीक्षा यस्य चाग्निपरिग्रहः॥ ब्रह्मचारि

यतीनां च शरीरे॰ ॥ नास्ति सूतकं ॥ नारदतंत्रे ॥ सूतके मृतके चैव नित्यं विभ्रमयस्य च ॥ सानुष्ठानस्य विप्रें
द्रस्य पः शुद्धिः प्रजायते ॥ श्रीलक्षणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ॥ पूजां गृह्णामि शूद्राणां पुनः साचारवर्त्म
नां ॥ लिंगपुराणे ॥ न चैवापूज्य भुंजीत शिवलिंगं महेश्वरि ॥ सूतके मृतके वापि नत्याज्यं शिवपूजनं ॥ अन्य
त्रापि ॥ अग्निहोत्रे गवां गोष्ठे तीर्थेष्वपि च पर्वसु ॥ राहोर्दर्शनकाले च सूतकं नैव विद्यते ॥ इति पुरश्चरण
विधिः ॥ यत्कृष्णप्रणिपातधूलिधवलं तद्वै शिरः स्याच्छुभं ॥ नेत्रे ते तन सोक्षिते च शुचिरे याभ्यां ह
रिर्दृश्यते ॥ सा बुद्धिर्नियमेयमेश्च विमला या माधवे ध्यायिनी सा जिह्वामृतवर्षिणि प्रतिपदं य
स्तौति नारायणम् ॥ श्रीभवानीशंकराभ्यां नमः ॥